'अन्नं पञ्चगुणे साध्यं विलेपी च चतुर्गुणे ।
मण्डश्चतुर्द्दशगुणे यवागूः षड्गुणेऽम्भसि ॥'
इति वैद्यकोक्तो भेद इह गाह्यतः ।" इति तट्टीकायां भरतः ॥ अस्या गुणाः ।
"यवागूर्व्वृंहणी ग्राही लघ्वी वस्तिविशोधनी ।
अतीसारे ज्वरे दाहे हिता वह्निप्रदीपनी ॥"
इति राजवल्लभः ॥

(अथास्या गुणा लक्षणञ्च ।
"सन्दीपनी स्वेदकरी यवागूः
सम्पाचनी दोषमलामयानाम् ।
सन्तर्पणी धातु बलेन्द्रियाणां
शस्ता भवेत् सा ज्वररोगिणाञ्च ॥
भागैकञ्च भवेत्तत्र द्विभागेन जलं क्षिपेत् ।
चित्रकं पिप्पलीमूलं पिप्पलीचव्यनागरम् ॥
धान्यकस्य समांशानि पिष्ट्वा श्वेतांश्च तण्डुलान् ।
संसृष्टा शिथिला किञ्चित् सा यवागूर्निगद्यते ॥
यवागूमुपभुञ्जानो जनो गात्रविमार्च्चरेत् ।
शाकमांसफलैर्युक्ता यवागूः स्याच्च दुर्ज्जरा ॥"
इति हारीते प्रथमस्थाने १२ अध्याये ॥
"यावागूः षड्गुणजले सिद्धा स्यात् कृशरा घना ।
यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी ॥"
इति मध्यखण्डे द्वितीयेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

यवाग्रजः, पुं, (यवाग्रात् जायते इति । जन् + डः ।) यवक्षारः । इत्यमरः । २ । ९ । १०८ ॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"पाक्यः क्षारो यवक्षारो यावशूको यवाग्रजः ॥")
यवानी । इति राजनिर्घण्टः ॥

यवानः, त्रि, (यवेन वेगेन अनिति जीवतीति । अन् + अच् ।) वेगी । इति मेदिनी । ने, १११ ॥

यवानिका, } यावानी, } स्त्री, (दुष्टो यवः । "यवाद्दोषे ।" ४ । १ । ४९ । इत्यस्य वर्त्तिकोक्त्या ङीष् आनुगागमश्च । पक्षे स्वार्थे कन् ।) ओषधिभेदः । योयानि इति भाषा । तत्पर्य्यायः । दीप्यकः २ दीप्यः ३ यवसाह्वः ४ यवाग्रजः ५ दीपनी ६ उग्रगन्धा ७ वातारिः ८ भूकदम्बकः ९ यवजः १० दीपनीयः ११ शूलहन्त्री १२ यवानिका १३ उग्रा १४ तीव्रगन्धा १५ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातार्शःश्लेष्मशूलाध्मानकृमिच्छर्द्दिनाशित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च । अथ यवान्या नामगुणाः ।
"यवानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका ।
सवोक्ता दीप्यका दीप्या तथा स्याद्यवसाह्वया ॥
यवानी पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः ।
दीपनी च तथा तिक्ता पित्तला शुक्रशूलहृत् ।
वातश्लेष्मोदरानाहगुल्मप्लीहकृमिप्रणुत् ॥
अथ अजमोदाया नामानि गुणाश्च ।
अजमोदा खराश्वा च मायूरी दीप्यकस्तथा ।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तका ॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत् ।
उष्णा विदाहिनी हृद्या वृष्या बलकरी लघुः ॥
नेत्रामयकृमिच्छर्द्दिहिक्कावस्तिरुजो हरेत् ॥
अथ खुरासानीयवानीनामगुणाः ।
पारसीकयवानी तु यवानीसदृशी गुणैः ।
विशेषात् पाचनी रुच्या ग्राहिणी मादिनी गुरुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

यवापत्यं, क्ली, (यवस्यापत्यम् । तज्जातत्वात्तथात्वम् ।) यवक्षारः । इति राजनिर्घण्टः ॥

यवाम्लजं, क्ली, (यवाम्लाभ्यां जायते इति । जन् + डः ।) सौवीरम् । इति राजनिर्घण्टः ॥

यवासः, पुं, (यौतीति । यु + "ऋतन्यञ्जीति ।" उणा० ४।२। इत्यादिना आसः ।) दुरालभा । यथा,—
"यासो यवासो दुःस्पर्शो धनुर्यासो दुरालभा ॥"
इति रत्नमाला ॥
खदिरभेदः । यथा,—
"कण्टकी वासपत्रश्च यवासः खदिरस्तथा ॥"
इति शब्दमाला ॥
यवासा इति ख्याता कण्टकीक्षुपविशेषः । तत्पर्य्यायः । यासः २ बहुकण्टकः ३ अल्पकः ४ क्षुद्रेङ्गुदी ५ रोदनिका ६ कच्छुरा ७ बालपत्रः ८ विषघ्नः ९ कण्टकालुकः १० त्रिकर्णिका ११ गान्धारी १२ अनन्ता १३ । अस्य गुणाः । मधुरतिक्तत्वम् । शीतत्वम् । पित्तार्त्तिदाहनाशित्वम् । बलदीपनकारित्वम् । तृष्णाकफच्छर्द्दिविसर्पजित्त्वञ्च । इति राजनिर्घण्टः ॥

यवासकः, पुं, (यवास + स्वार्थे कन् ।) दुरालभा । इति शब्दरत्नावली ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"क्षयकासं ससन्तापं पार्श्वशूलानपास्यति ।
गुडूचीत्रिफलावासात्रायमाणायवासकैः ॥")

यवासशर्करा, स्त्री, (यवासेन तद्रसेन कृता शर्करा । शाकपार्थिववत् समासः ।) यवासरसघटितशर्करा । तत्पर्य्यायः । सुधामोदकः २ मोदकः ३ तवराजः ४ खण्डसरः ५ खण्डजः ६ खण्डमोदकः ७ । अस्या गुणाः । अतिमधुरत्वम् । पित्तश्रमतृषापहत्वम् । वृष्यत्वम् । विदाहमूर्च्छार्त्तिभ्रान्तिशान्तिकरत्वम् । सरत्वञ्च । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"यवासशर्करा मधुरकषाया तिक्तानुरसा श्लेष्महरी सरा चेति ॥")

यवासा, स्त्री, (यवास + टाप् ।) गुण्डासिनीतृणम् । इति राजनिर्घण्टः ॥

यवाह्वः, पुं, (यवमाह्वयति स्वकारणत्वादिति । आ + ह्वे + कः ।) यवक्षारः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये ।
"यवाह्वगैरिकोन्मिश्रैः पादक्षेपः प्रशस्यते ॥"
गुणादिविशेषोऽस्य यवक्षारशब्दे विज्ञेयः ॥)

यविष्ठः, त्रि, (अयमेषामतिशयेन युवा इति । युवन् + इष्ठन् । "स्थूलदूरेति ।" यणादिलोपगुणौ ।) अतिशययुवा । (यथा, ऋग्वेदे । १ । १४७ । २ ।
"बोधा मे अस्य वचसो यविष्ठ ।")
कनिष्ठभ्रातरि, पुं । इति हेमचन्द्रः । ३।११६ ॥ (त्रिष्वपि । यथा, भागवते । ३ । १ । ५ ।
"भ्रातुर्यविष्ठस्य सुतान् विबन्धून्
प्रवेश्य लाक्षाभवने ददाह ॥")

यवीयान्, [स्] त्रि, (अयमनयोरतिशयेन युवा । युवन् + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५।३।५७ । इति ईयसुन् ।) कनिष्ठः । (यथा, मनौ । २ । १२८ ।
"अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् ॥")
अतिशय युवा । इति मेदिनी । से, ६१ ॥

यवोत्थं, क्ली, (यवेभ्य उत्तिष्ठतीति । उद् + स्था + कः ।) सौवीरकम् । इति राजनिर्घण्टः ॥

यव्यं, त्रि, (यवानां भवनं क्षेत्रम् । यव + "यवयवकषष्टिकाद् यत् ।" ५।२।३ । इति यत् ।) यवादिभवनोचितक्षेत्रम् । तत्पर्य्यायः । यवक्यम् २ षष्टिक्यम् ३ । इत्यमरः । २ । ९ । ७ ॥ यवोचितम् ४ यवकोचितम् ५ । इति शब्दरत्नावली ॥ (यवेभ्यो हितम् । यव + "खलयवमाषतिलवृषब्रह्मणश्च ।" ५ । १ । ७ । इति यत् । यवहितः । इति व्याकरणम् ॥)

यव्यः, पुं, (यवेभ्यो हितः । यव + यत् ।) मासः । यथा,—
"यव्यद्वयं श्रावणादि सर्व्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्व्वीत वर्ज्जयित्वा समुद्रगाः ॥"
इति प्रायश्चित्ततत्त्वे गङ्गामाहात्म्यम् ॥
(स्त्री, नदीभेदः । यथा, ऋग्वेदे । ८।९८।८ ।
"वावृत्वा यव्याभिर्व्वर्द्धन्ति शूरब्रह्माणि ।"
"यव्याभिः नदीभिः । अवनयः यव्याः इति नदीनामसु पाठात् ।" इति तद्भाष्ये सायणः ॥)

यशः, [स्] क्ली, (अश्नुते व्याप्नोतीति । अश + "अशेर्देवने युट् च ।" उणा० ४ । १९० । इत्यसुन् युट् च ।) सुख्यातिः । तत्पर्य्यायः । कीर्त्तिः २ समज्ञा ३ । इत्यमरः ।१।६।११॥ समाख्या ४ कीर्त्तना ५ अभिख्यानम् ६ आज्ञा ७ समण्या ८ । इति शब्दरत्नावली ॥
"दानादिप्रभवा कीर्त्तिः शौर्य्यादिप्रभवं यशः ।"
इति माधवी ॥
अतएव यशःकीर्त्त्योर्भिदस्यापि दर्शनात् यशःकीर्त्तिपरिभ्रष्टो जीवन्नपि न जीवति । इति कस्यचित् प्रयोगः । जीवतः ख्यातिर्यशो मृतस्य ख्यातिः कीर्त्तिरिति केचित् । तन्न साधु कीर्त्तिस्ते नृप दूतिकेति प्रयोगदर्शनात् ।" इत्यमरटीकायां भरतः ॥ कीर्त्तिनाशे दोषो यथा,—
"हन्ति यः परकीर्त्तिञ्च स्वकीर्त्तिं मानवाधमः ।
स कृतघ्न इति ख्यातस्तत्फलञ्च निशामय ॥
अन्धकूपे वसेत् सोऽपि यावदिन्द्राश्चतुर्द्दश ।
कीटैर्नकुलमानैश्च भक्षितः सततं नृप ! ॥
तप्तक्षारोदकं पापी नित्यं पिबति खादति ।
ततः सर्पो जन्म सप्त काकः पञ्च ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४९ अध्यायः ॥